Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

VU-94-Sans.Vangmay

यहाँ से काटिए

# वरिष्ठ उपाध्याय परीक्षा, 2016

## संस्कृत वाङ्मय (अनिवार्यः)

समय : 3¼ घण्टे

पूर्णांक : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरी नामाङ्कः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

1) शिवराजविजय: की दृशं गद्यकाव्यम् अस्ति? [1]

2) सिंहदुर्गे ससेन: क: विराजते स्म? [1]

3) अम्बिकादत्तव्यासस्य पूर्वजा: राजस्थाने कुत्र निवसन्ति स्म? [1]

4) वीरभूमिकाव्ये कस्य वर्णनम् अस्ति? [1]

5) चित्रकूटस्य आकार: कीदृशो विद्यते? [1]

6) पाटणपुराभिमुखं गोपुराग्र्चं केन नाम्ना ख्यातम् अस्ति? [1]

7) बाघसिंह: कस्य प्रपौत्र: आसीत्? [1]

8) 'पोरदुपधात्' इति सूत्रस्य सोदाहरणमर्थो लेख्य: । [2]

9) ''नदीभिश्च'' इति सूत्रस्य व्याख्या कार्या । [3]

10) 'शिवराजविजयस्य शिववीरः नायकोऽस्ति' इति स्पष्टयत । [3]

11) चित्रकूटनगरस्य महिमवर्णनं स्वशब्देषु कुरुत । [3]

12) निम्नलिखित श्लोकयोः एकस्य श्लोकस्य सप्रसङ्गं व्याख्या विधेया – [1 + 3 = 4]

क) निर्ह्रादिनिर्झरगलज्जलशीतलासु

वल्लीवितानविलसद्विटपाकुलासु ।

तिग्मांशुदीधितिभिरप्यविलोकितासु

गर्जन्ति यत्र हरयो गिरिकन्दरासु ।।

ख) एह्येहि वीरवसुधाधवशोणितौघ –

प्रक्षालितां परमपुण्यतमां सुरभ्याम् ।

श्रीचित्रकूटनगरीमवलोक्य चित्तात्

कातर्यसम्भवमलं विनिवारयामः ।।

13) निम्नलिखित श्लोकयोः एकस्य श्लोकस्य सप्रसङ्गं भावार्थो लेख्यः– [1 + 3 = 4]

क) अग्रे विभात्यखिलगोपुररत्नमेतत्

श्रीरामगोपुरमशेषमनोऽभिरामम् ।

यत् कुम्भभूमिपतिना प्रणयातिरेकात्

संस्थापितं स्वनगरीललनाललाटे ।।

ख) एताः करालवदनाः सुविशालकायाः

किं नावलोकयसि भीमरवाः शतहनीः ।

चित्रं यदाननसमुद्गतपाव कौघैः

श्यामीकृतानि सहसा द्विषतां मुखानि ।।

14) अधोलिखित वाक्येषु पञ्चवाक्यानां संस्कृतभाषायामनुवादो विधेयः– [5 × 1 = 5]

i) रास्ते के दोनों ओर पेड़ हैं ।

ii) राम के साथ सीता वन में गयी ।

iii) माता पुत्र पर क्रोध करती है ।

iv) व्याकरण वेद का मुख है ।

v) विश्व में भारतदेश श्रेष्ठ है ।

vi) भरत दौड़ते हुए घोडे से गिरा ।

vii) गोपाल धेनु से दूध दुहता है ।

viii) हम देश में स्वच्छता अभियान को सफल बनायेंगे ।

15) अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत । [5]

i) स्वच्छता भियानम्

ii) संस्कृतदिवसः संस्कृतसप्ताहश्च

iii) आतङ्कवादः

iv) भ्रष्टाचारप्रशमनम्

16) निम्नलिखितेषु पञ्चपदानां सङ्घटनां विधाय वाक्येष्वपि प्रयोगं कुरुत– [5 × 1 = 5]

i) दा + अनीयर्

ii) पच् + क्तवतु

iii) लुण्ट् + षाकन्

iv) पूर्वं भूतः

v) गोभ्यः हितम्

vi) द्वौ च दश च

vii) जनानां समूहः

viii) शिक्षामधीते वेद वा

17) निम्नाङ्कितेषु गद्यांशेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या विधेया – [2×4½=9]

क) इतस्तु दृश्यतां किं भवति पुण्यनगर इति । जाल्मयवनाखेटव्य सनिनः शिववीरस्य शनैः शनैर्दिल्लीश्वरेणापि सह वैरं ववृधे । दिल्लीश्वरस्तु शास्तिखान–नामानं कचिद् यवनवीरं प्रेष्य पुण्यनगरं तध्दस्तादाचिच्छिदे । सम्प्रति हि पुण्यनगरे शिववीराध्युषितचरे महाप्रसादे सपरिवारः शास्तिखानः प्रतिवसति ।

ख) ''कोऽयं कुतोऽयं चरो वा सन्देशहरो वा कपटपथिको वा अस्मत्पक्षपाती वा शत्रुपदातिर्वा कोऽप्युभयपक्षोदासीनो वेति सद्य एव विज्ञेयम्'' इति विचारयन् मन्दिरपाश्चात्त्यप्राचीर–गवाक्षा–दायान्तं कश्चिदस्पष्टा लापध्वनीमश्रौषीत् । क्षणं विरम्य च गवाक्षसमीपमागत्य ध्वनिप्रतिध्वनिर्भिरव्यक्तांश बहुलामप्येवमुक्तिं निश्चिच्ये ।

ग) मन्दिराध्यक्षस्तु स्वरेण आकृत्या च तं परिचिन्वन्नपि तन्नियमं संस्मृत्य न तथाऽचेष्टत यथा स विज्ञातः स्यादपरैः ।

शिववीरस्तु तेन सह चिरमालप्य तस्य वृतान्तमवस्थां प्रकृतिं चावगत्य चिराय श्रुतचरं 'भूषण' कविरित्यभिधानं चोररीकृत्य ' श्वो द्रष्टा भवान् शिवराजम्' इत्यभिधाय न्यवर्त्तिष्ट ।

निवर्तमानश्च तेनापि 'को भवान्?' इति पृष्टः एतद्देशीयः कोऽपि 'वीरोऽस्मि' इत्युदतीतरत् ।

घ) अस्मांक स्थूलकायाः सरलभूभागमात्रधावनाभ्यासिनो ह्याः तदुपरि च महाकवचाः शस्त्रास्त्रमहाभार भृतः सादिनः इति ते न शक्नुवन्ति उद्घातिनीषु उपत्यकासु तथा अश्वांश्चालयितुं यथा महाराष्ट्रा लघुभिः पार्वतघोटकैरुन्दुखः इव कुहरेषु निविशन्ते मर्कटा इव सानुमत्सानून्यारोहन्ति पक्षिणः इवोपत्यकात उपत्यकामुड्डीयेव गच्छन्ति शशका इव च तरुलतासु सपद्यात्मानमाच्छाद्य तिष्ठन्ति ।

18) एधितव्यम्, शिष्यः, कुम्भकारः, जनमेजयः, भिन्नः, रामः, सुपानः, भुक्त्वा, एषु पञ्च प्रयोगाः साधनीयाः । [5 × 2 = 10]

19) वागर्थाविव, निर्मक्षिकम्, नखनिर्भिन्नः, पौर्वशालः, प्राचार्यः, रूपवद्भार्यः, ईशकृष्णौ, अर्धर्चः, एषु पञ्च प्रयोगाः साधनीयाः । [5 × 2 = 10]

20) औत्सः, गार्ग्यायणः, वैनतेयः, शुक्रियम्, ग्रामीणः, ऐहलौकिकम्, पैरोहित्यम्, पण्डितः. एषु पञ्च प्रयोगाः साधनीयाः । [5 × 2 = 10]

⊖⊖⊖

DO NOT WRITE ANYTHING HERE